# ॥ दत्तात्रेयोपनिषत् ॥

दत्तात्रेयीब्रह्मविद्यासंवेद्यानन्दविग्रहम् ।
त्रिपान्नारायणाकारं दत्तात्रेयमुपास्महे ॥
ॐ भद्रं कर्णेभिः श्रुणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ॥
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेम देवहितं यदायुः ॥
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ॥
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥
ॐ शान्तिः शान्तिः शान्तिः ॥
हरिः ॐ ॥ सत्यक्षेत्रे ब्रह्मा नारायणं महासाम्राज्यं किं
तारकं तन्नो ब्रूहि भगवन्नित्युक्तः सत्यानन्द सात्त्विकं मामकं
धामोपास्वेत्याह । सदा दत्तोऽहमस्मीति प्रत्येतत्संवदन्ति येन ते
संसारिणो भवन्ति नारायणेनैवं विवक्षितो ब्रह्मा विश्वरूपधरं
विष्णुं नारायणं दत्तात्रेअयं ध्यात्वा सद्वदति । दमिति हंसः ।
दामिति दीर्घं तद्बीजं नाम बीजस्थम् । दामित्येकाक्षरं भवति ।
तदेतत्तारकं भवति । तदेवोपासितव्यं विज्ञेयं गर्भादितारणम् ।
गायत्री छन्दः । सदाशिव ऋषिः । दत्तात्रेयो देवता । वटबीजस्थमिव
दत्तबीजस्थं सर्वं जगत् । एतदैवाक्षरं व्याख्यातम् । व्याख्यास्ये
षडक्षरम् । ओमिति द्वितीयम् । ह्रीमिति तृतीयम् । क्लीमिति चतुर्थम् ।
ग्लौमिति पञ्चमम् । द्रामिति षष्ठम् । षडक्षरोऽयं भवति ।
योगानुभवो भवति । गायत्री छन्दः । सदाशिव ऋषिः । दत्तात्रेयो
देवता । द्रमित्युक्त्वा द्रामित्युक्त्वा वा दत्तात्रेयाय नम इत्यष्टाक्षरः ।
दत्तात्रेयायेति सत्यानन्दचिदात्मकम् । नम इति पूर्णानन्दकविग्रहम् ।
गायत्री छन्दः । सदाशिव ऋषिः । दत्तात्रेयो देवता । दत्तात्रेयायेति
कीलकम् । तदेव बीजम् । नमः शक्तिर्भवति । ओमिति प्रथमम् । आमिति
द्वितीयम् । ह्रीमिति तृतीयम् । क्रोमिति चतुर्थम् । एहीति तदेव वदेत् ।
दत्तात्रेयेति स्वाहेति मन्त्रराजोऽयं द्वादशाक्षरः । जगती छन्दः ।
सदाशिव ऋषिः । दत्तात्रेयो देवता । ओमिति बीजम् ।
स्वाहेति शक्तिः । संबुद्धिरिति कीलकम् । द्रमिति हृदये ।
ह्रीं क्लीमिति शीर्षे । एहीति शिखायाम् । दत्तेति कवचे ।
आत्रेयेति चक्षुषि । स्वाहेत्यस्त्रे । तन्मयो भवति ।
य एवं वेद । षोडशाक्षरं व्याख्यास्ये ।
प्राणं देयम् । मानं देयम् । चक्षुर्देयम् । श्रोत्रं देयम् ।
षड्दशशिरश्छिनत्ति षोडशाक्षरमन्त्रे न देयो भवति ।

अतिसेवापरभक्तगुणवच्छिष्याय वदेत् ।ओमिति प्रथमं भवति ।
ऐमिति द्वितीयम् ।क्रोमिति तृतीयम् ।क्लीमिति चतुर्थम् ।
क्लूमिति पञ्चमम् ।ह्रामिति षष्ठम् ।ह्रीमिति
सप्तमम् ।ह्रूमित्यष्टमम् ।सौरिति नवमम् ।
दत्तात्रेयायेति चतुर्दशम् ।स्वाहेति षोडशम् ।
गायत्री छन्दः ।सदाशिव ऋषिः ।दत्तात्रेयो देवता ।
ॐ बीजम् ।स्वाहा शक्तिः ।चतुर्थ्यन्तं कीलकम् ।
ओमिति हृदये ।क्लां क्लीं क्लूमिति शिखायाम् ।सौरिति
कवचे ।चतुर्थ्यन्तं चक्षुषि ।स्वाहेत्यस्त्रे ।यो
नित्यमधीयानः सच्चिदानन्द सुखी मोक्षी भवति ।
सौरित्यन्ते श्रीवैष्णव इत्युच्यते ।तज्जापी विष्णुरूपी
भवति ।अनुष्टुप् छन्दो व्याख्यास्ये ।सर्वत्र
संबुद्धिरिमानीत्युच्यन्ते ।दत्तात्रेय हरे कृष्ण
उन्मत्तानन्ददायक ।दिगंबर मुने बालपिशाच
ज्ञानसागर ॥१॥ इत्युपनिषत् ।अनुष्टुप् छन्दः ।
सदाशिव ऋषिः ।दत्तात्रेयो देवता दत्तात्रेयेति हृदये ।
हरे कृष्णेति शीर्षे ।उन्मत्तानन्देति शिखायाम् ।
दायकमुन इति कवचे ।दिगंबरेति चक्षुषि ।
पिशाचज्ञानसागरेत्यस्त्रे ।आनुष्टुभोऽयं
मयाधीतः ।अब्रह्मजन्मदोषाश्च प्रणश्यन्ति ।
सर्वोपकारी मोक्षी भवति ।य एवं वेदेत्युपनिषत् ॥१॥
इति प्रथमः खण्डः ॥१॥
ओमिति व्याहरेत् ।ॐ नमो भगवते दत्तात्रेयाय
स्मरणमात्रसन्तुष्टाय महाभयनिवारणाय
महाज्ञानप्रदाय चिदानन्दात्मने बालोन्मत्त-
पिशाचवेषायेति महायोगिनेऽवधूतायेति
अनसूयानन्दवर्धनायात्रिपुत्रायेति सर्वकामफल-
प्रदाय ओमिति व्याहरेत् ।भवबन्धमोचनायेति
ह्रीमिति व्याहरेत् ।सकलविभूति दायेति क्रोमिति व्याहरेत् ।
साध्याकर्षणायेति सौरिति व्याहरेत् ।सर्वमनः-
क्षोभणायेति श्रीमिति व्याहरेत् ।महोमिति व्याहरेत् ।
चिरञ्जीविने वषडिति व्याहरेत् ।वशीकुरुवशीकुरु
वौषडिति व्याहरेत् ।आकर्षयाकर्षय हुमिति
व्याहरेत् ।विद्वेषयविद्वेषय फडिति व्याहरेत् ।
उच्चाटयोच्चाटय ठठेति व्याहरेत् ।स्तम्भय-
स्तम्भय खखेति व्याहरेत् ।मारयमारय नमः

संपन्नाय नमः संपन्नाय स्वाहा पोषयपोषय
परमन्त्रपरयन्त्रपरतन्त्रांश्छिन्धिच्छिन्धि
ग्रहान्निवारयनिवारय व्याधीन्निवारयनिवारय दुःखं
हरयहरय दारिद्र्यं विद्रावयविद्रावय देहं
पोषयपोषय चित्तं तोषयतोषयेति सर्वमन्त्र-
सर्वयन्त्रसर्वतन्त्रसर्वपल्लवस्वरूपायेति ॐ नमः
शिवायेत्युपनिषत् ॥ २॥
इति द्वितीयः खण्डः ॥ २॥
य एवं वेद । अनुष्टुप् छन्दः । सदाशिव ऋषिः ।
दत्तात्रेयो देवता । ओमिति बीजम् । स्वाहेति शक्तिः ।
द्रामिति कीलकम् । अष्टमूर्त्यष्टमन्त्रा भवन्ति ।
यो नित्यमधीते वाय्वग्निसोमादित्यब्रह्मविष्णुरुद्रैः
पूतो भवति । गायत्र्या शतसहस्रं जप्तं भवति ।
महारुद्रशतसहस्रजापी भवति । प्रणवायुतकोटिजप्तो भवति ।
शतपूर्वाञ्छतापरान्पुनाति । स पङ्क्तिपावनो भवति ।
ब्रह्महत्यादिपातकैर्मुक्तो भवति । गोहत्यादिपातकैर्मुक्तो भवति ।
तुलापुरुषादिदानैः प्रपापानतः पूतो भवति ।
अशेषपापान्मुक्तो भवति । भक्ष्याभक्ष्यपापैर्मुक्तो भवति ।
सर्वमन्त्रयोगपारीणो भवति । स एव ब्राह्मणो भवति ।
तस्माच्छिष्यं भक्तं प्रतिगृह्णीयात् । सोऽनन्तफलमश्नुते ।
स जीवन्मुक्तो भवतीत्याह भगवान्नारायणो ब्रह्माणमित्युपनिषत् ॥
ॐ भद्रं कर्णेभिः श्रुणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ॥
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेम देवहितं यदायुः ॥
ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥
ॐ शान्तिः शान्तिः शान्तिः ॥ हरिः ॐ तत्सत् ॥
इति दत्तात्रेयोपनिषत्समाप्ता ॥

---

Please send corrections to sanskrit@cheerful.com
Last updated April 25, 2000